International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(4): 09-11
© 2018 IJSR
www.anantaajournal.com
Received: 04-05-2018
Accepted: 05-06-2018

**विघ्नेश्वरभट्टः**
सहायकप्राध्यपकः
अमृतविश्वविद्यापीठम्,
मैसूरु, कर्नाटक, भारत

**Correspondence**
**विघ्नेश्वरभट्टः**
सहायकप्राध्यपकः
अमृतविश्वविद्यापीठम्,
मैसूरु, कर्नाटक, भारत

# लौकिकालौकिकसुखसम्पादनत्वेन पुराणेषु विहिततुलसीसेवनस्य विमर्षात्मकमध्ययनम्

**विघ्नेश्वरभट्टः**

**सारांश**
विदितमेव सर्वेषां समेषाम् अत्र भवतां भवतां महतां जीवोऽयं बहुपुण्यवशेनैव मानवशरीरमेतीति। मानवजन्मन उद्देश्यं तावत् पुरुषार्थसम्पादनमित्यत्र नास्ति नैकमत्यम्। निषिद्धकर्मानुष्ठानेन आत्मा पापयुक्तो भवति पापजन्यं दुःखं शरीरमाध्यमेन अनुभवति च। विहितकर्मानुष्ठानेन लौकिकालौकिकं सुखं आप्नोत्यात्मा इत्यत्र अस्ति विनिगमकं प्रमाणम्। कदाचिन्मानवः अज्ञानवशात् पापमनुतिष्ठति तथा च पापविमुक्तये मार्गान् अन्विषति च। अस्माकं तावत् नित्यनैमित्तिककाम्यकर्मणां ज्ञानसङ्ग्रहः श्रुतिस्मृतिपुराणावलोकनेनैव सिध्यति। पुराणेषु अनेके विषयाः विचारिताः निर्णीताश्च। तेषु अन्यतमोऽयं तुलसीविचारोऽपि।

**कुट शब्दः** पुराण, मानवशरीर, पापयुक्त, तुलसीविचारोऽपि

**प्रस्तावना.**
का इयं तुलसी इति उद्भूते प्रश्ने सस्यविशेषा इति उत्तरं सामान्यतः प्राप्येत। तत्र श्रुतौ सस्यलोकः प्रपञ्चितः विभागपुरस्सरम्। तथा च श्रुतिः

"पुष्पावती प्रसूवती फलिनीरफलावृतः सत्वा इव सजित्वरीर्वीरुधः पारयिष्णवः"
अद्यापि सस्यविज्ञानिभिः योविभागः कृतः सः एतद्विभागं नातिशेते। तत्र वनस्पतिः , वृक्षः , लता , गुल्मः , तृणम् औषधरूपेण सस्यलोकः विभक्तः।
१ अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः। यथा औदुम्बरादयः। (Angiosperms)
२ पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः। यथा आम्रादयः। (Spermatophytes)
३ बीजकाण्डरुहाश्चैव प्रतानवत्य एव च। यथा मल्लिकादयः। (Sporophytes)
४ गुच्छगुल्मन्तु विविधम्। यथा केतक्यादिः। (Sporophytes)
५ तथैव तृणजातयः। यथा तृणादयः। (Sporophytes)
६ ओषध्यः फलपाकान्ताः। यथा गोधूमादयः। (Spermatophytes)

**तुलसीमाहात्म्यम्**
परं यत्किञ्चित् सस्यं प्रसिद्धेषु पुराणेषु न विचार्यते , विचारितं चेत् अत्रेदमवधेयम् अस्ति तस्य माहात्म्यमिति। तथा च तुलसी इति पदम् अन्वर्थकम्। तत्र इयं व्युत्पत्तिरवधेया तुलां स्यति नाशयतीति तत्सादृश्यराहित्यं ब्रूते। तेनैव तुलसि माहात्म्यसदृशमिति अवगम्यते। अपि च तुलस्याः निरुक्तिरेवमुक्ता बृहद्धर्मपुराणे –

> तकारो मरणं प्रोक्तं तद्योगः स्यादुकारतः।
> मृता लसति सेत्येवं तुलसीत्येव गीयते ॥

उक्त्या अनया मानवकुलस्य सञ्जीविनी एषा तुलसी इति अवगम्यते। तुलस्याः कस्य च भागस्य महत्वं इश्यते चेत् , तदेवं पद्मपुराणे शिवेन भणितम्–

> पत्रं पुष्पं फलं मूलं शाखा त्वक् स्कन्धसंज्ञितम्।
> तुलसीसम्भवं सर्वं पावनं मृत्तिकादिकम् ॥

तुलसीसस्यं यस्मिन् स्थाने आविर्भूतं तस्य स्थानस्य मृदारभ्य वायुपर्यन्तानि सर्वाणि पावनान्येव।
तथा च श्रूयते अभियुक्तोक्तिः –

मन्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
मानसं वारुणं चैव सप्तस्नानमुदीरितम् ॥

तत्र भौमस्नाने मृत्तिका अपेक्षते। सा च मृत्तिका यदि तुलसी क्षेत्रस्था भवति तदा तस्य स्नानस्य पापापनोदकत्वं पुराणेषु उदीरितम्। तदेवं पद्मपुराणस्य ब्रह्मखण्डे सूतः जगाद ,

तुलसी मृत्तिकालिप्तो युक्तः पापशतैरपि।
विमुञ्चति नरः प्राणान् सयाति हरिमन्दिरम् ॥ इति ॥

गृहस्थानां तावत् स्नानसन्ध्यापूजाजपहोमस्वाध्यायातिथ्यं चेति षट्कर्म विहितम्। तेषु देवतापूजनरूपकर्मणि पत्रपुष्पाणि अपेक्षितानि। तत्र तुलसीपत्रमपि प्रसिद्धम्। उत्पाटितं तुलसीपत्रं सदा निर्मलं न कदाचिदपि पर्युषितं भवति इत्यत्र किञ्चित् विनिगमकम् उपलभ्यते। तद्यथा

अर्कस्य दिनमेकं पङ्कजस्य दिनत्रयम्।
पञ्चाहं बिल्वपत्रं च निर्मलं तुलसीदलम् ॥ इति

यः सदा हरिं तुलस्या सम्पूजयति सः निस्संशयं विष्णुलोकं अवाप्नोति इति पुराणानि पुष्टीकुर्वन्ति। तुलसीपत्रं न केवलं पूजाकर्मण्येव विनियुज्यते ,अपि तु देहसौष्ठवशेधनकर्मण्यपि। तदेवं भावप्रकाशकर्तृणा उल्लिख्यते –

तुलसी कटुका तिक्ता हृद्योष्णादाहपित्तहृत्।
दीपनीकुष्ठकृछ्वासपार्श्वरुक्कफवातजित् ॥ इति ॥

अनेन तुलस्या देहः रक्षितो भवति इति बुध्यते। तुलसीपुष्पमपि अतिमुख्यं स्थानं भजते। ये च तुलसीपुष्पेण अनुदिनं हरिं अर्चयन्ति ते च विभिन्नैः विविधपुष्पैः अर्चितैः अर्जितं फलमाप्नुवन्ति आसूर्यचन्द्रपर्यन्तं सुखमनुभवन्ति च इत्यस्ति पुराणप्रसिद्धिः। तदेवं पद्मपुराणस्य उत्तरखण्डे शिवः उवाद–

नानापुष्पैः कृता पूजा यावच्चन्द्रदिवाकरौ।
नवीनया च मञ्जर्या पूजनं च करोति यः ॥

"देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेदिति" उक्तिः आगमेषु प्रसिद्धा एव। देवत्वसिद्धये अनेके नियमाः पुराणादिषु विहिताः। भवगन्धविशुद्धये तुलसीगन्धधारणं पुराणप्रसिद्धमेव। तस्य च तुलसीगन्धस्य सर्वपापहारकत्वमपि पुराणेषु उल्लिखितम्। तथा च दैवत्वसम्पादकत्वमपि उल्लिखितम्। तद्यथा पद्मपुराणे शिवेन इत्थं न्यगादि–

न तेन सदृशो लोके वैष्णवो भुवि दृश्यते।
यः प्रयच्छति कृष्णस्स तुलसीकाष्ठचन्दनम् ॥

जगतः स्थितिकर्ता विष्णुः इति विदितमेव सर्वेषाम्। तस्य सान्निध्यसिध्यर्थमेव बहवः बहुविधया यतन्ते। सर्वैः यत्नेन प्राप्यमाणः हरिः तुलसीवनेनैव विना यत्नं प्राप्नोति इति पुराणेषु प्रतिपादितम्। यत्र तुलसी विद्योतते तत्र दारिर्द्यभयरोगादयः न कदाचिदपि प्रविशन्ति। तदेवं निरूपितं पद्मपुराणे–

यत्र यत्र गृहे ग्रामे वने वा तुलसी भवेत्।
तत्र तत्र जगत्स्वामी प्रीतात्मा च वसेद्धरिः ॥
गृहे तस्मिन् न दारिर्द्यं नायोगो बन्धुसम्भवः।
न दुःखं न भयं रोगाः तुलसी यत्र तिष्ठति ॥

देवर्षिपितृणाम् ऋणापकरणं विना ऊर्ध्वलोकावाप्तिः नैव सम्भवति इति शास्त्रसिद्धविषयः। तत्र पितृणापकरणाय श्राद्धं विहितम्। श्राद्धयोग्यस्थानानि शास्त्रेणैव विहितानि। तत्र तुलसीछायावृतदेशोऽपि श्राद्धयोग्यस्थानत्वेन आदृतः। तुलसीवने कृतेन तर्पणेन पिण्डदानेन च पितरः अक्षय्यां तृप्तिम् अवाप्नुवन्ति। तया च तृप्त्या ऋणविमुक्तः कर्ता च पारलौकिकं सुखमवाप्नोति इति च तत्र तत्र श्रूयते। ब्रह्मविष्णुमहेश्वराः क्रमेण सृष्टिस्थितिलयकर्तारः इति अविवादम्। तेषां च आवासस्थानं तुलसी एव। तदेवं पद्मपुराणे महादेव उवाच–

तस्यामूले स्थितो ब्रह्मा मध्येदेवो जनार्दनः।
मञ्जर्यां वसते रुद्रः तुलसी तेन पावनी ॥ इति ॥

वैज्ञानिका अपि श्लोकममुं अन्यथैव वर्णयन्ति। तुलसीमूलस्य कषायपानेन शरीरे रोगनिरोधकशक्तयः आविर्भवन्ति। तदेव देहे उत्पद्यमानसृष्टिकृत्यम्। तथा च काष्ठानां सजलेन घर्षणेन उत्पन्नस्य गन्धस्य अनुलेपनेन त्वक्कान्तिः परिरक्षिता पुष्टीकृताऽपि भवति। सैव स्थितिकृत्यम्। एवं पर्णमञ्जर्यादीनां सेवनेन शरीरस्थाः व्याधयः अपकृष्टाः भवन्ति। तदेव लयकृत्यम्। अत एव सृष्टिस्थितिलयात्मिका तुलसी मानवजीवनोपयोगिका इति ते आमनन्ति। अस्माकं सनातनधर्मः यागधर्मः। मृतानामपि होमः धर्मशास्त्रेषु विहितः। तत्र होमे मृतशरीरमेव हविः। स च होमः अन्त्येष्टि शब्देन व्यवह्रीयते। तत्र इन्धनत्वेन काष्ठाः अपेक्षन्ते यदि तत्र तुलसीकाष्ठाः इन्धनत्वेन उपयुज्यन्ते तदा मृतः सर्वपापैः विमुक्तः सन् मोक्षमेति इत्यपि श्रूयते।

यद्येकं तुलसीकाष्ठं मध्ये काष्ठस्य तस्य हि।
दाहकाले भवेन्मुक्तिः कोटिपापयुतस्य च ॥ इति ॥

न केवला मृतके उपयुक्ता तुलसीकाष्ठाः पुण्यदायकाः। अपि तु पौष्टिके कर्मण्यपि तुलसीकाष्ठोपयोगेन अतिशयफलार्जनं पद्मपुराणे शिवेन प्रतिपादितम्।

होमं कुर्वन्ति ये विप्राः तुलसीकाष्ठवह्निना।
सिक्ते सिक्ते तिले वापि अग्निष्टोमफलं लभेत् ॥ इति ॥

इत्थञ्च सिद्धं तुलस्याः प्राशस्त्यं प्रयोजनं पापहारकत्वम् अतिशयकलजनकत्वं च। पुराणेषु तुलसीव्रताचरणं च उल्लिखितं दरीदृश्यते।

कार्तिके शुक्लपक्षेतु नवम्यां चैव नारद।
नियमस्थे व्रती तिष्ठेत् भूमिशायी जितेन्द्रियः ॥
व्रतं त्रिरात्रमुद्दिश्य शुचिसंयतमानसः।

इत्यादिवाक्यैः पद्मपुराणे व्रतविधानं बभाण सदाशिवः। व्रते तावत् उपचारैः तुलसीपूजनं निवेदनादिकं प्रसिद्धमेव। इयं च तुलसी प्रथमं कया आरोपिता कुत्र इति प्रश्ने जाते एवमुदीरितं महादेवेन पद्मपुराणे–

उमया त्वं पुरा देवि शङ्करार्थं हिमालये।
रोपिता शतवृक्षेषु तुलसीं प्रणतोस्म्यहम् ॥

उक्त्यानया शङ्करार्थं पार्वत्या हिमालये तुलसी आरोपिता इति विज्ञायते। न केवला तया तुलसी आरोपिता अपि तु अनेके वृक्षाः रोपिताः। परन्तु तेषु वृक्षेषु तुलसी एव पुण्यतमा इति उपरितनेन वाक्येन विज्ञायते। उदेति प्रश्नः कदा तुलसी आरोपणीया आरोपिते किं वा प्रयोजनमिति। तदेवम् श्रूयते पद्मपुराणे–

पार्वणावसरे यस्तु श्रावणे चारोपयेत्।
सङ्क्रान्ति दिवसे चैव तुलसी चातिपुण्यदा ॥
तुलस्या पूजयेन्नित्यं दरिद्रोपीश्वरोभवेत्। इति ॥

श्लोकेनाऽनेन तुलस्याः प्राशस्त्यं प्रयोजनञ्च उपलभ्यते। तुलसीदलोत्पाटनेऽपि कश्चन नियमः पुराणेषु उक्तः। हरिस्मरणपूर्वकं तालत्रयताडनेन सह तुलसीपत्रम् उत्पाटयेदिति पुराणप्रोक्तनियमः। एवमेव केषुचिद्दिनेषु तुलसीदलोत्पाटनं निषिद्धम्। तदेवं कुत्रचिच्छ्रूयते

भृग्वर्काङ्गारवारेषु द्वादश्यां पञ्चपर्वसु।
यश्छिनत्ति तुलसिं सछिनते हरेः शिरः ॥ इति ॥

एतादृशमहिमान्वितायाः तुलस्याःनित्यसेवनेन नित्यात्मकस्य श्रीहरेः सायुज्यम् आप्नोति मानवः इति पुराणानि जेगीयन्ते। नात्र अतिशयः उच्यते अपि तु वास्तव एव कथ्यते। इत्थञ्च लौकिकालौकिकसुखसम्पादनत्वेन तुलसीसेवनं पुराणेषु विहितम्। वयन्तु मानवाः अल्पमतयः हरिसायुज्यसिद्धये नितरां यतमानाः आराधयामः।

**ग्रथने आदृतानां ग्रन्थानां नामानि**


1. पद्मपुराणम् चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका– श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी
2. बृहद्धर्मपुराणम् . चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका – श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी
3. भावप्रकाशः चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका – श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी
4. वाचस्पत्यम् चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका – श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी
5. शब्दकल्पद्रुमः चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका– श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी
6. स्मृतिसङ्ग्रहः चौकाम्बा संस्कृत प्रतिष्ठान वारणासी हिन्दीटीका– श्लोकानुक्रमणी सहित। टीकाकार – श्रीशिवप्रसादद्विवेदी